# UNIVERSITY OF CALICUT

# SCHOOL OF DISTANCE EDUCATION

## (2014 Admission Onwards)

**B.A DEGREE PROGRAMME**

**SANSKRIT**

**SEMESTER - V CORE COURSE**

# VYAKARANA AND NYAYA - II

UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

Study Material

**B.A DEGREE PROGRAMME**

**SANSKRIT**

**SEMESTER - V CORE COURSE**

# VYAKARANA AND NYAYA - II


| *Prepared by :* | *Scrutinized by:* |
|---|---|
| Sharmila K Thankappan,<br>Asst. Prof. in Sanskrit- Nyaya,<br>Department of Sanskrit,<br>SNGS College, Pattambi | Dr. Pushpadasan Kuniyil<br>Assistant Professor,<br>Department of Sanskrit,<br>SNGS College, Pattambi |


*Settings & Lay Out By: SDE Computer Cell.*

# तर्कसंग्रहदीपिका

<u>मङ्गलश्लोकः</u> –

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।

टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥

विश्वेश्वरं –विश्वस्य ईश्वरं,अम्बया सह वर्तते इति –साम्बा सा मूर्तिः(शरीरं) यस्य तं साम्बमूर्तिं, प्रणिपत्य – नमस्कृत्य, गिरां – वाचां, गुरुं(विद्यागुरुं) च (प्रणिपत्य) तर्कसंग्रहदीपिकां शिशुहितां टीकां कुर्वे इति दीपिकायाः मङ्गलश्लोकः ।

<u>मङ्गलस्य समाप्ति साधनत्वं</u> –

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधित कर्तव्यताकमिष्टदेवता नमस्कारात्मकं मङ्गलं ग्रन्थादौ निबन्धन् । एतदपि ग्रन्थरचनावेलायां शिष्याः अपि एवं मङ्गलं कुर्वन्तु इति बोधनाय प्रतिजानिते इति ।

मङ्गलस्य समाप्ति साधनत्वं नास्तीति पूर्वपक्षमतम् । अन्वयव्यतिरेक व्यभिचारात् मङ्गलस्य समाप्ति साधनत्वं नास्तीति तेषां अभिप्रायः । कारण सत्वे कार्य सत्वं अन्वयव्याप्तिः । यत्र अन्वयव्याप्तेः भङ्गः तत्र अन्वयव्यभिचारः। तदाहि कारण सत्वे कार्याभावः अन्वयव्यभिचारः । कारणाभाव कार्याभावयोः व्याप्तिः व्यतिरेक व्याप्तिः । यत्र व्यतिरेकव्याप्तेः भङ्गः तत्र व्यतिरेक व्यभिचारः। तदाहि कारणाभावे कार्योत्पत्तिः व्यतिरेक व्यभिचारः ।

अत्र मङ्गलं कारणं समाप्तिः कार्यम् । यत्र मङ्गलसत्वेऽपि समाप्त्यभावः तत्र अन्वयव्यभिचारः । कादम्बर्यादौ मङगले कृतेऽपि समाप्त्यदर्शनात्

अन्वयव्यभिचारः । यत्र मङ्गलाभावेऽपि समाप्तिः दर्शनात् तत्र व्यतिरेक व्यभिचारः । किरणावल्यादौ मङ्गलाभावेऽपि समाप्तिः दर्शनात् व्यतिरेक व्यभिचारः । एवं कार्य कारण व्याप्तेः भङ्गदर्शनात् मङ्गलं समाप्तिं प्रति न कारणं इति पूर्वपक्षस्य आशयः ।

आचार्यः पूर्वपक्षं निराकरोति । कादम्बर्यादौ विघ्नबाहुल्यात् समाप्त्यभावः।

अतः न अन्वयव्यभिचारः । एवं किरणावल्यादौ ग्रन्थात् बहिः ग्रन्थकर्ता मङ्गलमाचरितं इति अनुमीयते। एवं अन्वयव्यतिरेक व्यभिचारयोः अभावात् मङ्गलस्य समाप्ति साधनत्वं अस्ति इति सिध्यति ।

<u>मङ्गलस्य कर्तव्यत्वे प्रमाणम् –</u>

मङ्गलस्य कर्तव्यत्वे प्रमाणं नास्तीति पूर्वपक्षमतम् । एतत् निराकरोति आचार्यः मङ्गलस्य कर्तव्यत्वे शिष्टाचारानुमित श्रुतिरेव प्रमाणम् । तथाहि मङ्गलं वेदबोधितकर्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात्, दर्शादिवत् इति अनुमानवाक्यम् । अत्र भोजनादौ व्यभिचारवारणाय अलौकिकेति पदम् ।रात्रि श्राद्धादौ व्यभिचारवारणाय अविगीतेति पदम् । अलौकिकाविगीताचारः शिष्टानां आचारः, तद्बोधयितुं उक्तं शिष्टेति ।

<u>तर्कसंग्रह पदस्य व्युत्पत्तिः –</u>

तर्क्यन्ते प्रतिपादयन्त इति तर्काः,द्रव्यादि सप्त पदार्थाः तेषां संग्रहः – संक्षेपेण स्वरूपकथनं क्रियते इति ।

- बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वोऽयं ग्रन्थः ?

तर्कग्रन्थाः अतिविस्तृतत्वात् बालानां बोधो न जायते । अतः बालानां सुखबोधाय तर्कसंग्रहः क्रियते । ग्रहणधारणपटुः बालः ।

## (1). उद्देशप्रकरणम्

### पदार्थाः

पदार्थस्य व्युत्पत्ति लक्षणं च –

पदस्यार्थः पदार्थः इति व्युत्पत्तिः। अभिधेयत्वं पदार्थ सामान्य लक्षणं ।

पदार्थ विभागसूत्रे सप्तपदस्य प्रयोजनम्

द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः इति पदार्थ विभागसूत्रे सप्तपदस्य निवेशः व्यर्थमिति पूर्वपक्षः । एतत् निरासार्थं आचार्येण उच्यते अधिकसंख्याव्यवच्छेदार्थकत्वात् सप्तपदं प्रयुज्यते । अर्थात् पदार्थेषु सप्त अधिकसंख्या नास्तीति व्यावर्तयितुमिति ।

यतः यद्यतिकसंख्याव्यवच्छेदः सप्तपदप्रयोजनं तर्हि सप्तातिरिक्तः कश्चन पदार्थः प्रमितः वा न इति वक्तव्यम् ।यदि प्रमितः स्यात् तर्हि प्रमितस्य निषेधायोगत्।

न प्रमितः स्यात् तर्हि प्रतियोगिप्रमितिं विना निषेधानुपपत्तेः इति पूर्वपक्षस्य आशयः।

तन्निराकरोति आचार्यः पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यं इति व्यवच्छेदार्थकत्वात् । सप्तग्रहणं सफलं इति सिद्धान्तः ।

सप्तान्यतमत्वं इत्यस्य सप्तभिन्नभिन्नत्वं इत्यर्थः इति पूर्वपक्षः।अत्र सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वव्याप्तिनिश्चयोऽपि न स्यत् ।

पूर्वोक्तं निराकरोति आचार्यः द्रव्यादिसप्तान्यतमत्वं इत्यस्य द्रव्यादिभेदसप्तकाभाववत्वं इत्यर्थः अतः न दोषः ।।

## १.द्रव्यम्

द्रव्यलक्षणम् - गुणवत्वं क्रियावत्वं द्रव्यत्वजातिमत्वं वा द्रव्यसामान्यलक्षणम् ।

तमसः दशमद्रव्यत्व निराकरणम्

तमसः द्रव्यं नीलःतमश्चलतीत्यबाधितप्रतीतिबलात् । यथाहि नीलरूपाधारतया क्रियाधारतया च तमसो द्रव्यत्वं सिद्धम् ।एवं द्रव्यस्य द्रव्यसामान्यलक्षणं तमसोस्ति अतः तमः दशमं द्रव्यं भवतीति मीमांसकस्य आशयः।

एतत् तमः पृथिव्यादि नवभ्यो न अन्तर्भवति,प्रसिद्धद्रव्य वैधर्म्यात् । तथाहि –

तमसः पृथिव्यां न अन्तर्भावः – गन्धत्वाभावात्,स्पर्शरहितत्वाश्च ।

तमसः जले न अन्तर्भावः –शीतस्पर्शाभावात्,नीलरूपाश्रयत्वात् च ।

तमसः तेजसि न अन्तर्भावः – भास्वररूपाभावात्,उष्णस्पर्शाभावात् च ।

तमसः वायौ न अन्तर्भावः – रूपवत्वात ,स्पर्शाभावात्सदा गतिमत्वाभावाश्च।

तमसः आकाशादि पञ्चके न अन्तर्भावः – नीलरूपवत्वात् । तस्मात् तमः दशमं द्रव्यमिति मीमांसकाः ।

मीमांसकमतं निराकरोति आचार्यः। तमसो न दशमं द्रव्यं । तथाहि – तमः न रूपवदद्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात्, आलोकाभाववत् । यदि रूपद्रव्य चाक्षुषप्रत्यक्षे आलोकस्यकारणत्वात्, प्रौढप्रकाशतेजोः सामान्याभावः तमः । तत्र नीलं तमः चलतीति प्रत्ययो भ्रमः । अतः तमसो दशमद्रव्यत्वं नास्ति तेजोऽभावरूपमेव । अतः नव द्रव्याणीति सिद्धम् ।

लक्षणदोषाः

अव्याप्ति-अतिव्याप्ति-असम्भवाः लक्षणदोषाः । लक्षैकदेशावृत्तित्वं अव्याप्तिः । यथा गोः कपिलत्वम् । अलक्ष्यवृत्तित्वं अतिव्याप्तिः । यथा गोः श्रृङ्गित्वम्। लक्ष्यमात्रावर्तनं असम्भवः । यथ गोरेकशफवत्वम् ।

<u>लक्षणस्य लक्षणम्</u>

असाधारणधर्मवचनं लक्षणम् । अव्याप्ति-अतिव्याप्ति-असम्भव दूषणत्रयरहितो धर्मो लक्षणम् । यथा गोः सास्नादिमत्वम् । लक्ष्यतावच्छेदकत्वं असाधारणत्वं ।

<u>लक्षणस्य प्रयोजनम्</u>

व्यावर्तकं व्यवहारं वा लक्षणस्य प्रयोजमम् ।

<u>'गुणवत्वं न द्रव्यसामान्यलक्षणम्' इति पूर्वपक्षमतं खण्डयत</u>

पूर्वपक्षमतमनुसृत्य गुणवत्वं न द्रव्यसामान्यलक्षणम् आद्यक्षणावच्छिन्नघटे उत्पन्नविनष्टघटे चाव्याप्ति दोषात् । आचार्यःएतत् निराकरोति गुणसमानाधिकरणसत्ताभिन्नजातिमत्वस्य विवक्षितत्वात् न पूर्वोक्त दोषः ।पुनः पूर्वपक्षिः द्रव्यलक्षणे अतिव्याप्तिः आशङ्गते । एकं रूपं रसात् पृथक् इति व्यवहारस्थले रूपे गुणे गुणान्तरस्य वृत्तित्वं प्रतीयते । तन्निराकरोति आचार्यः गुणे गुणानङगीकारात्, तथा च एकं रूपं रसात् पृथक् इति व्यवहारस्थले रूपादयो गुणाः एकस्मिन्नर्थे समवेताः, न तु एकस्मिन् गुणे गुणान्तरम् । तथा च द्रव्यलक्षणस्य न रूपादिषु गुणेषु अतिव्याप्तिः ।

## २. गुणः

- <u>गुण लक्षणम्</u> – द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः । गुणत्व जातिमान् वा ।
- लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात्कथं चतुर्विंशति गुणाः ?

  लघुत्वस्य गुरुत्वाभावरूपत्वात्, मृदुत्वकठिनत्वयोः अवयवसंयोग विशेषरूपत्वात् चतुर्विंशति गुणाः ।

**३.कर्म**

संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म, कर्मत्वजातिमान् वा । उत्क्षेपणा∫पक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चकर्माणि । सर्वोषामपि संयोगानामसमवायिकारणं भवति कर्म । चलनात्मकं कर्म । ऊर्ध्वदेश संयोगहेतुः उत्क्षेपणम् । अधोदेशसंयोगहेतुः अपक्षेपणम् । शरीरसन्निकृष्टसंयोगहेतुःआकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् ।अन्यत् सर्वं गमनं । भ्रमणरेचनस्यन्दनऊर्ध्वज्वलनादीनां कर्मणां गमने अन्तर्भावात् न तानि कर्मान्तराणि ।

**४.सामान्यम्**

नित्यमनेकानुगतं सामन्यम् । द्रव्यगुणकर्मवृत्तिः ।परमपरं चेति द्विविधं सामन्यम् ।परमधिकदेशवृत्तिः । परं सत्ताजातिः। अपरं न्यूनदेशवृत्तिः, द्रव्यत्वादिः । सामान्यविशेषसमवायाभावेषु जातिर्नास्ति ।

**५.विशेषः**

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव । पृथिव्यादिचतुष्टयस्य परमाणवः, आकाशादिपञ्चकं च नित्यद्रव्याणि

**६.समवायः**

समवायस्त्वेक एव । नित्यसम्बन्धः समवायः । गुणगुणिनोः, क्रियाक्रियावन्तौ, जाति-व्यक्ति, विशेष-नित्यद्रव्ययोश्च यः सम्बन्धः सः समवायः ।

**७.अभावः**

अभावश्चतुर्विधः – प्रागभावः,प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति ।

(2). **द्रव्यलक्षणप्रकरणम्**

## १.पृथिवी

- पृथिव्यां सुरभ्यसुरभ्यवयवारब्धे परस्परविरोधेन गन्धानुत्पत्तिः इति पूर्वपक्ष मतं निराकरोति

पूर्वपक्षः – सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादात् अव्याप्तिः इति।

आचार्यः - गन्धानुपलब्धिरिति न च वाच्यं । अवयवगन्धस्यैव तत्र प्रतीति सम्भवेन,चित्रगन्धस्य अनङ्गीकारात् च ।

पूर्वपक्षः – उत्पन्नं द्रव्यं क्षणमगुणमक्रियं च इति नियमात्, उत्पन्नविनष्टघटे अव्याप्तिः।

आचार्यः - पूर्वोक्त अतिव्याप्तिः न सम्भवति । गन्धवत्वं इत्यस्य गन्धसमान अधिकरण द्रव्यत्वापरजातिमत्वस्यैव विवक्षितत्वात् ।

पूर्वपक्षः – जलादावपि गन्धप्रतीतेः अतिव्याप्तिः ।

आचार्यः – अन्वयव्यतिरेकाभ्यां गन्धः पृथिव्यामेव अतः पूर्वोक्त अतिव्याप्तिः न स्यात् ।

पूर्वपक्षः – कालस्य सर्वाधारतया सर्वेषां लक्षणानां काले अतिव्याप्तिः इति ।

आचार्यः – सर्वाधारताप्रयोजक सम्बन्धभिन्नसम्बन्धेन लक्षणं लक्ष्ये वर्तते इत्यतः न अतिव्याप्तिः ।

एवं गन्धं पृथिवीमात्रवृत्तिः इति स्थाप्यते आचार्येण अतः गन्धवत्वं पृथिव्याः लक्षणम् ।

- पृथिवी द्विविधा। (1)नित्यत्वं ध्वंसाप्रतियोगित्वम्।
  (2)अनित्यत्वं ध्वंसप्रतियोगित्वम्।

  अनित्य पृथिवी त्रिविधा ।

  (1)आत्मनो भोगायतनं शरीरं ।

  (2) शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमन संयोगाश्रयत्वमिन्द्रियत्वम् ।

  (3)शरीरेन्द्रियभिन्नो विषयः ।

  एवं गन्धवत् शरीरं पार्थिवशरीरं । गन्धवदिन्द्रियं पार्थिवेन्द्रियम् । गन्धगन्धवन् विषयः पार्थिवविषयः इति तल्लक्षणम् ।

## २.जलम्

शीतस्पर्शवत्य आपः । उत्पन्नं द्रव्यं क्षणमगुणमक्रियं च इति नियमात्, उत्पन्नविनष्टजले अव्याप्तिः इति पूर्वपक्षः । उक्त अतिव्याप्तिः न सम्भवतीति आचार्यः – शीतस्पर्शसमानाधिकरण द्रव्यत्वापरजातिमत्वस्यैव विवक्षितत्वात् । पूर्वपक्षः पुनः 'शीतं शिलातलं' इति प्रतीत्य शिलातलादिषु अतिव्याप्तिः इत्युच्यते। अन्वयव्यतिरेकाभ्यां शीतस्पर्शः जले एवेति, शिलातले जलसम्बन्धादेव शीतस्पर्शभानमिति अतः पूर्वोक्त अतिव्याप्तिःन स्यात् ।एवं शीतस्पर्शं जलमात्रवृत्तिः, अतः शीतस्पर्शवत्वं जलस्य लक्षणम्।

## ३.तेजः

उष्णस्पर्शवत्तेजः इति तेजलक्षणे अतिव्याप्तिराशङ्ग्यते पूर्वपक्षः। तथाहि 'उष्णं जलं' इति प्रतीतेः उष्णस्पर्शस्य जले अतिव्याप्तिः इतिः । 'उष्णं जलं' इति प्रतीतेः तेजसम्बन्धानुविधायित्वात् न अतिव्याप्तिः इति आचार्यः ।

- सुवर्णस्य तैजसत्वं स्थापयत ?

    अत्र सुवर्णस्य पार्थिवत्वं आशङ्कते पूर्वपक्षः।। तथाहि "सुवर्णः पार्थिवं पीतत्वात् गुरुत्वाद्वा हरिद्रादिवत्"। तन्निराकरोति आचार्यः – अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन, जलमध्यस्थघृते द्रवत्वनाशादर्शनेन, असति प्रतिबन्धके पार्थिवद्रवनाश-अग्निसंयोगयोः कार्यकारणभाववधारणात्, सुवर्णस्य अत्यन्तानलसंयोगे सति अनुच्छिद्यमान द्रवत्वाधिकरणत्वेन, पार्थिवत्वानुपपत्तेः । तस्मात् पीतद्रवद्रव्यत्वनाश प्रतिबन्धकतया द्रवद्रव्यान्तरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः ।रूपवत्तया वाय्यादिष्वनन्तर्भावात् तैजसत्व सिद्धिः । उष्णस्पर्शभास्वररूपयोः उपष्टम्भक पार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः । तस्मात् सुवर्णं तैजसमिति सिद्धम् ।

## ४ वायुः

रूपरहितस्पर्शवान् वायुः इति लक्षणम् । अत्र

- रूपरहितवान् वायुः इति लक्षणे सति आकाशात् अतिव्याप्तिः। एतत् अतिव्याप्तिः वारणाय स्पर्शवान् इति दलम् ।
- स्पर्शवान् वायुः इति लक्षणे सति पृथिव्यादावतिव्याप्तिः। एतत् अतिव्याप्तिः वारणायरूपरहितवान् इति दलम् ।

- कः प्राणः? प्राणश्च कुत्रान्तर्भावः ?

    शरीरान्तसञ्चारी वायुः प्राणः । प्राणः एक एव । स्थान भेदात् प्राणापानादि संज्ञां लभते । प्राण-अपान-उदान-समान-व्यान इति ।

- वायोः प्रत्यक्षत्वमस्ति वा न वा (प्रमाणं किम्) ?

स्पर्शानुमेयो वायुः । तथाहि "योऽयं वायौ वाति सति अनुष्णाशीतस्पर्श उपलभ्यते, स क्वचिदाश्रितो,गुणत्वात् रूपवत्"।

अयं स्पर्शः न पृथिव्याश्रयः -उद्भूतस्पर्शवत् पार्थिवस्यउद्भूतरूपवत्वनियमात्।

न जलतेजसि - अनुष्णाशीतस्पर्शवत्वात् ।

न विभुचतुष्टयं –सर्वत्र उपलब्धिप्रसङ्गात् ।

न मनः - परमाणुस्पर्शस्य अतीन्द्रियत्वात् ।

तस्मात् प्रतीयमान स्पर्शाश्रयः स वायुः । वायुः न प्रत्यक्षः किन्तु अनुमेयः एव । वायौ अनुमानमेव प्रमाणम् ।

**सृष्टिप्रलयनिरूपणम्**

ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रियाजायते । ततः परमाणुद्वयसंयोगे सति द्वणुकं उत्पद्यते । ततः त्रिभिः द्वणुकैः त्र्यणुकम् । एवं चतुरणुकादि क्रमेण महती पृथिवी, महत्य आपो, महत् तेजो, महान् वायुः उत्पद्यते ।

एवं उत्पन्नस्य कार्यद्रव्यस्य संजिकीर्षावशात् परमाणुषु क्रिया । क्रियया परमाणु द्वयविभागे सति द्वणुकनाशः। ततः त्र्यणुकनाशः ततः चतुरणुकस्य नाशः इत्येवं पृथिव्यादिनाशः।

असमवायि कारणवशात् द्वणुकनाशः, समवायि कारणवाशात् त्र्यणुकनाशः इति प्राचीनाः । किन्तु सर्वत्रासमवायिकारण नाशात् कार्यद्रव्यनाशः इति नवीनाः।

- परमाणुसद्भावे प्रमाणम् –

  परमाणुसद्भावे अनुमानं प्रमाणम् अस्ति ।"जालसूर्यमरीचिस्थं सूक्ष्मतमं यद्रज उपलभ्यते तत्सावयवम्, चाक्षुषद्रव्यत्वात्,पटवत्" । एवं सिद्धिः रजः – त्र्यणुकः, 'त्र्यणुकावयवः अपि सावयवः महदारम्भकत्वात्, तन्तुवत्' । त्र्यणुकावयवः – द्वणुकः, द्वणुकावयवः – स परमाणुः, स च नित्यः । परमाणेरपि कार्यत्वे तस्यावयवः, तस्याप्यवयवः इत्येवं क्रमेण अवयवपरम्परया अनवस्था प्रसज्यत । अतः परमाणुः निरवयवः ।

- सृष्टिप्रलयसद्भावे प्रमाण –

  'धाता यथापूर्वमकल्पयत्' इत्यादि श्रुतिरेव प्रमाणम् । प्रलयः द्विविधः । सर्व कार्यद्रव्यध्वंसः <u>अवान्तरप्रलय</u> । सर्वभावकार्यध्वंसो <u>महाप्रलयः</u> ।

## ५ आकाशः

शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च । आकाशः पृथिव्यादिवत् नाना न भवति – भेदे प्रमाणाभावात् । एकत्वादेव सर्वत्र शब्दः उपलब्धेः विभुत्वं अङ्गीकर्तव्यम् । सर्वभूतद्रव्य संयोगित्वं विभुत्वम् ।मूर्तत्वं परिच्छिन्न परिमाणवत्वं वा । विभुत्वात् एव आत्मवत् नित्यम् ।

## ६ कालः

अतीतादिव्यवहारहेतुः कालः । स च एकः विभुर्नित्यश्च । सर्वाधारः कलः सर्वकार्य निमित्तकारणं च ।

## ७ दिक्

प्राच्यादिव्यवहारहेतुः दिक् । स च एका नित्या विभ्वि च । दिगपि कालादिवत् कार्यमात्रे निमित्तकारणम् ।

## ८ आत्मा

आत्मनो लक्षणं - ज्ञानाधिकरणमात्मा । आत्मानं विभजते – स द्विविधः जीवात्मा परमात्मा चेति । परमात्मनो लक्षणं –तत्रेश्वरः सर्वज्ञः परमात्मा एक एव । नित्यज्ञानाधिकरणत्वमीश्वरत्वम् ।

- ईश्वरस्य सद्भावे किं प्रमाणम् –

पूर्वपक्षस्याशयः – ईश्वरसद्भावे न तावत् प्रत्यक्षं प्रमाणम् । न बाह्यप्रत्यक्षं,अरूपिद्रव्यत्वात् । न आभ्यन्तरप्रत्यक्षं, आत्मसुखादि व्यतिरिक्तत्वात्। न अनुमानं प्रमाणम्, लिङ्गाभावात् । न आगमं प्रमाणम् तथाविध आगमाभावात् । अतः ईश्वरः नास्तीति पूर्वपक्षः ।

आचार्यः पूर्वपक्षमतं निराकरोति – तत्र अनुमानप्रमाणम् अस्ति। 'क्षित्यङ्गुरादिकं कर्तृजन्यं कार्यत्वात्, घटवत्' इत्यनुमानेन ईश्वरसिद्धिः।एतत् अनुमानेन क्षित्यादीनां कर्तृत्वं अस्मदादीनां जीवात्मनां न सम्भवति इत्यतः क्षित्यादीकर्तृत्वेन ईश्वरसिद्धिः। कर्तृत्वं नाम उपादानगोचरापरोक्षज्ञान चिकीर्षाकृतिमत्वम् ।उपादानं समवायिकारणम् । सकलपरमाण्वादि सूक्ष्मदर्शित्वात्सर्वज्ञत्वम् । यः सर्वज्ञः स सर्ववित् इत्याद्यागमोऽपि तत्र प्रमाणम् ।

- जीवात्मा लक्षणम् –

सुखाद्याश्रयत्वं जीवात्मा लक्षणम् ।

अयं जीवात्मा न शरीरमेव, शरीरस्य आत्मत्वे करपादादिनाशे सति शरीरनाशादात्मनोऽपि नाश प्रसङ्गात् ।

ना∫पि इन्द्रियाणामात्मत्वं, इन्द्रियाणामात्मत्वे 'यो∫हं घटमद्राक्षं सो∫हमिदानीं स्पृशामि' इत्यनुसन्धानाभावप्रसङ्गात्,अन्यानुभूते अन्यस्य अनुसन्धानायोगात् ।

तस्मात् देहेन्द्रियव्यतिरिक्तो जीवः सुखदुखादिवैचित्र्यात् प्रतिशरीरं भिन्नः ।

स च न परमाणुपरिमाणः, सर्वशरीरव्यापि सुखाद्यनुपलब्धिप्रसङ्गात् ।

न मध्यम परिमाणः, तथा सति अनित्यत्वप्रसङ्गेन कृतनाशाकृताभ्यागम प्रसङ्गात् ।तस्मात् नित्यो विभुर्जीवः ।

## ९ मनः

मनसो लक्षणं – सुखाद्युपलब्धिसाधनमिन्द्रियं मनः ।स्पर्शरहितत्वे सति क्रियावत्वं मनसो लक्षणम् ।

मनो विभजते – प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च। एकैकस्य आत्मनः एकैकं मनः आवश्यकं इत्यात्मनो अनेकत्वात् मनसो∫प्यनेकत्वं इति। न मध्यमपरिमाणः अनित्यत्वप्रसङ्गात् ।

- पूर्वपक्षस्याशयः – मनः विभुः स्पर्शरहितद्रव्यत्वात् आकाशवत् ।
  आचार्यः पूर्वपक्षमतं निराकरोति – मनसो विभुत्वे दोषमाह,आत्मनःविभुत्वं पूर्वं उपपदितं मनसः अपि विभुत्वे ज्ञानासमवायिकारणस्य आत्ममनसंयोगस्य अनुत्पत्या ज्ञानानुत्पत्ति प्रसङ्गः ।विभुद्वय संयोगः नित्यत्वात् सुषुप्त्यभाव प्रसङ्गः पुरीतत् व्यतिरिक्तप्रदेशे आत्ममनसंयोगस्य सर्वदा विद्यमानत्वात्। मनसः अणुत्वे तु यदा मनः पुरीतति नाड्यां प्रविशति तदा सुषुप्तिः, यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः ।

### (3) गुणलक्षणप्रकरण

#### १ रूपम्

लक्षणम् – चक्षुर्मात्रग्राह्यो गुणो रूपम् ।

दलप्रयोजनम् –

- सङ्ख्यादावतिव्याप्तिवारणाय मात्रपदम्।
- रूपत्वेऽतिव्याप्ति वारणाय गुणपदम् ।
- प्रभाभित्तिसंयोगेऽतिव्याप्तिवारणाय चक्षुमात्रग्राह्यजातिमत्वं।

रूपं विभजते - तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्

चित्ररूप स्थापनम् –

ननु अव्याप्यवृत्ति नीलादिसमुदाय एव चित्ररूपमिति चेन्न, रूपस्य व्याप्यवृत्तित्वनियमात् । ननु चित्रपटेऽवयवरूपस्य प्रतीतिरस्त्विवति चेन्न, रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसङ्गात् । न च रूपवत्समवेतत्वं प्रत्यक्षप्रयोजकः,गौरवात् । तस्मात्पटस्य प्रत्यक्षत्वानुपपत्या चित्ररूपसिद्धिः ।

रूपस्याश्रयमाह – पृथिवी-जल-तेजोवृत्तिः । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।

#### २ रसः

लक्षणम् – रसनाग्राह्यो गुणो रसः ।

दलप्रयोजनम् – रसत्वेऽतिव्याप्तिपरिहाराय गुणपदम् ।

रसस्याश्रयमाह – पृथिवीजलतेजोवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।

### ३ **गन्धः**

लक्षणम् – घ्राणग्राह्यो गुणो गन्धः ।

दलप्रयोजनम् – गन्धत्वेऽतिव्याप्तिवारणाय गुणपदम् ।

### ४ **स्पर्शः**

लक्षणम् – त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः ।

दलप्रयोजनम् – स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदम् ।संयोगादावतिव्याप्तिवारणाय मात्रपदम्।

- **रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र ?**

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्राऽपाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।

पाकजस्तेजःसंयोगः ।तेन पूर्वरूपं नश्यति-रूपान्तरमुत्पद्यत इत्यर्थः । अत्र परमाणुष्वेव पाकः, न द्वणुकादौ । आमपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरमुत्पत्तौ श्यामघटनाशे पुनर्द्वयणुकादिक्रमेण रक्तघटोत्पत्तिः ।तत्र परमाणवः समवायिकारणम्, तेजसंयोगः असमवायिकारणम् । अदृष्टादिकं निमित्तकारणम् । द्व्यणुकादिरूपे कारणरूपमसमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः ।पूर्वघटस्य नाशं विनैवावयवेषु परमाणुपर्यन्तेषु च युगपद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः । अतः एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः ।

### ५ **सङ्ख्या**

सङ्ख्या लक्षयति – एकत्वादिव्यवहारहेतुः सङ्ख्या ।

### ६ **परिमाणम्**

परिमाणं लक्षयति - मानव्यवहारासाधारणकारणं परिमाणम् ।

परिमाणं विभजते – तच्चतुर्विधम् अणु,महत्,दीर्घं,ह्रस्वं चेति ।

## ७ पृथक्त्वम्

पृथक्त्वम् लक्षयति - पृथग्व्यवहारा∫साधारणकारणं पृथक्त्वम् । इदमस्मात्पृथगिति व्यवहारकारणमित्यर्थः ।

## ८ संयोगः

संयोगं लक्षयति – संयुक्तव्यवहारहेतुः संयोगः।इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः।

संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाया∫साधारणेति देयम् । संयोगो द्विविधः – कर्मजः, संयोगजश्च । आद्यो हस्तक्रियया हस्तपुस्तकसंयोगः । द्वितीयो हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः । अव्याप्यवृत्तिः संयोगः । स्वात्यन्ताभाव समानाधिकरणत्वमव्याप्यवृत्तित्वम् ।

## ९ विभागः

विभागं लक्षयति –संयोगनाशको गुणो विभागः ।

दलप्रयोजनम् – कालादावतिव्याप्तिवारणाय गुण पदम्।

रूपादावतिव्याप्तिवारणाय संयोगनाशक पदम्।

विभागो∫पि द्विविधः – कर्मजो, विभागजश्च ।। आद्यो हस्तक्रियया हस्तपुस्तकविभागः । द्वितीयो हस्तपुस्तकविभागात्कायपुस्तकविभागः ।

## १०. ११. परत्वा∫परत्वम्

लक्षणम् – परव्यवहारासाधारणकारणं परत्वम् । अपरव्यवहारा∫साधारणकारणं अपरत्वम् ।

ते च द्विविधे – दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतं अपरत्वम्। ज्येष्ठे कालकृतं परत्वम् ।कनिष्ठे कालकृतं अपरत्वम् ।

१२ . **गुरुत्वम्**

गुरुत्वम् लक्षयति – आद्यपतनासमायिकारणं गुरुत्वम् । द्वितियादिपतनस्य वेगासमवायिकारणत्वात् वेगेऽतिव्याप्तिवारणाया आद्यपदम् ।

१३ . **द्रवत्वम्**

द्रवत्वम् लक्षयति – आद्यस्यन्दनासमायिकारणं द्रवत्वम् ।स्यन्दनं – स्रावणम् ।

तद् द्विविधम् –सांसिद्धिकं नैमित्तिकं च । तेजःसंयोगजन्यं नैमित्तिकद्रवत्वम् । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादौ । तेजसि सुवर्णादौ । नैमित्तिकभिन्नं सांसिद्धिकद्रवत्वम् । सांसिद्धिकं जले ।

१४ . **स्नेहः**

स्नेहं लक्षयति –चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।

दलप्रयोजनम् – जलादावतिव्याप्तिवारणाय गुण इति।

रूपादावतिव्याप्तिवारणाय चूर्णादिति ।

१५ . **शब्दः**

शब्दं लक्षयति –श्रोत्रग्राह्यो गुणः शब्दः ।

दलप्रयोजनम् – शब्दत्वेऽतिव्याप्तिवारणाय गुण इति।

रूपादावतिव्याप्तिवारणाय श्रोत्रेति ।

शब्दस्त्रिविधः संयोगजो, विभागजः,शब्दजश्चेति ।तत्राद्यो भेरीदण्डसंयोग जन्यः। द्वितीयो वंश उत्पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः । भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दः शब्दजाः ।

१६ . **बुद्धिः**

बुद्धेर्लक्षणमाह –सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्च ।

दलप्रयोजनम् – कालादावतिव्याप्तिवारणाय गुण पदम्।

रूपादावतिव्याप्तिवारणाय सर्वव्यवहार पदम्।

१७ . **सुखम्**

सुखं लक्षयति –सर्वेषामनुकूलवेदनीयं सुखम् । सुख्यहमित्याद्यनुव्यवसायगम्यं।

१८ . **दुःखम्**

लक्षणम् - प्रतिकुलवेदनीयं दुःखम् ।

१९ . **इच्छा**

इच्छा कामः।

२० . **द्वेषः**

क्रोधो द्वेषः।

२१ . **प्रयत्नः**

कृति प्रयत्नः।

२२ .**धर्मः**

विहितकर्मजन्यो धर्मः ।

## २३ . <u>**अधर्मः**</u>

निषिद्धकर्मजन्यो अधर्मः ।

## २४. <u>**संस्कारः**</u>

संस्कारः त्रिविधः – वेगो, भावना, स्थितिस्थापकः चेति । संस्कारत्वजातिमान् ।

वेगः - वेगत्वजातिमान् वेगः। वेगःपृथिव्यादि चतुष्टयमनोवृत्तिः ।

भावना – अनुभवजन्या स्मृतिहेतुर्भावना ।आत्ममात्रवृत्तिः । आत्मादतिव्याप्ति वारणाय अनुभवेति।अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृति इति ।

स्थितिस्थापकः – अन्यथाकृतस्य पुनस्तदवस्थ ऽपादकः स्थितिस्थापकः ।

- **चतुर्विंशतिगुणेषु अन्तर्भवितःबुद्धिः द्विधा स्मृतिरनुभवश्च ।**

<u>**स्मृतिः**</u>

**संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।**

अत्र भावनाख्यः संस्कारः । संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति। घटादिप्रत्यक्षे अतिव्याप्तिवारणाय संस्कारजन्यमिति ।प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेति ।

<u>**अनुभवः**</u>

**तद्भिन्न (स्मृतिभिन्नं) ज्ञानमनुभवः ।**

सःद्विविधः - यथार्थोऽयथार्थश्च ।

<u>**यथार्थानुभवः**</u>

**तद्वति तत्प्रकारकोऽनुभवो यथार्थः ।**

यथा – रजते 'इदं रजतमिति' ज्ञानम् ।ननु घटे घटत्वमिति प्रमायामतिव्याप्तिः, घटत्वे घटाभावादिति चेन्न, यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभवः इत्यर्थात् घटत्वे घटसम्बन्धंऽस्तीति नाव्याप्तिः । सैवेति यथार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः।

**<u>अयथार्थानुभवः</u>**

**तदाभाववति तत्प्रकारकोऽनुभवोऽ यथार्थः ।**

यथा – शुक्तौ 'इदं रजतमिति' ज्ञानम् ।सैव अप्रमेत्युच्यते । नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न, यदवच्छेदेन यत्सम्बन्धाभाव तदवच्छेदेन तत्सम्बन्ध ज्ञानस्य विवक्षितत्वात् । संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्व संयोगाभावावच्छेदेन संयोगज्ञानस्य प्रमात्वान्नातिव्याप्तिः ।

**<u>यथार्थानुभवभेदाः</u>**

**यथार्थानुभवश्चतुर्विधं - प्रत्यक्षाऽनुमित्युपमितिशाब्दभेदात् ।**

**तत्करणमपि चतुर्विधः - प्रत्यक्षाऽनुमानोपमानशब्दभेदात् ।**

**<u>करणम्</u>**

**असाधारणं कारणं करणम् ।**

साधारणकारणे दिक्कालादावतिव्याप्तिवारणाय असाधारणेति ।

**<u>कारणम्</u>**

**कार्यनियतपूर्ववृत्ति कारणम् ।**

दलप्रयोजनम् –पूर्ववृत्तिकारणम् इत्युक्ते रासभादावतिव्याप्तिः स्यात्, अतः नियतेति दलम्।नियतं इतिमात्रोक्ते कार्ये अतिव्याप्तिः, अतः पूर्ववृत्तिः इति दलम्।

ननु तन्तुरूपमपि पटं प्रति कारणं स्यदिति चेन्न, अनन्यथासिद्धत्वे सतीति विशेषणात् । अनन्यथासिद्धत्वं अन्यथासिद्धिविरहः।

- **अन्यथासिद्धिः**

अन्यथासिद्धिश्च त्रिविधा –

1.येन सहैव यस्य यं प्रति पूर्ववृत्तित्वं अवगम्यते तं प्रति तेन तदन्यथासिद्धम् ।

यथा तन्तुना तन्तुत्वं च पटं प्नति ।

2. अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वं अवगम्यते तं प्रति

तत् अन्यथासिद्धम् ।यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति आकाशस्य।

3.अन्यत्र व प्तनियतपूर्ववर्तिनं एव कार्यसंभवे तत्सहभूतमन्यथासिद्धम् । यथा

पाकजस्थले गन्धं प्रति रूपप्रागभावस्य ।

**कार्यम्**

**कार्यं प्रागभावप्रतियोगि ।**

**कारणभेदाः**

**कारणं त्रिविधं – समवाय्यसमवायिनिमित्तभेदात् ।**

**समवायिकारणम्**

**यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम् । यथा तन्तवः पटस्य समवायिकारणम् । पटश्च स्वगतरूपादेः समवायिकारणम् ।**

**असमवायिकारणम्**

**कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं तत् कारणमसमवायिकारणम्।**

कार्येण पटेन सहैकस्मिन् तन्तौ समवेतत्वात् तन्तु संयोगं पटस्यासमवायिकारणम्।

कारणेन पटेन सहैकस्मिन् तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणम्।

**निमित्तकारणम्**

**तदुभयभिन्नं कारणं निमित्तकारणम् ।**

समवाय्यसमवायि भिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य ।

**प्रत्यक्षप्रमाणम् ।**

**प्रत्यक्षम्**

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ।इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ।**

इन्द्रियं चक्षुरादिकं,अर्थो घटादिः।तयोः सन्निकर्षः संयोगादिः ।तज्जन्यं ज्ञानं प्रत्यक्षं इत्यर्थः ।तत् द्विविधम् – निर्विकल्पकं सविकल्पकं चेति ।

**निर्विकल्पकम्**

**निष्प्रकारकं ज्ञानं निर्विकल्पकं ज्ञानं निर्विकल्पकम्, यथा – किञ्चिदिदमिति ।**

विशेषणविशेष्यसम्बन्धानवगाहिज्ञानम् निर्विकल्पकम् इत्यर्थः ।

निर्विकल्पके किं प्रमाणम् ?

गौरितिविशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात् । विशेषणज्ञानस्यापि सविकल्पकत्वे ऽनवस्था प्रसङ्गात् निर्विकल्पकसिद्धिः ।

**<u>सविकल्पकम्</u>**

**सप्रकारकं ज्ञानं सविकल्पकम् ।**

नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहिज्ञानं सविकल्पकं इत्यर्थः । यथा ब्रह्मणोऽयं श्यामोऽयमिति ।

**<u>सन्निकर्षः</u>**

**प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड् विधः – संयोगः,संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति।**

1.**<u>संयोगः</u>**

**चक्षुषा घटप्रत्यक्षजनने संयोगसन्निकर्षः ।**

द्रव्यप्रत्यक्षे सर्वत्र संयोग सन्निकर्षः । आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षज्ञानमुत्पदायते ।

2. **<u>संयुक्तसमवायः</u>**

**घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः। चक्षुसंयुक्ते घटे रूपस्य समवायात् ।**

3. **<u>संयुक्तसमवेतसमवायः</u>**

**रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ।**

4. **<u>समवायः</u>**

**श्रोत्रेण शब्दसाक्षात्कारे समवाय सन्निकर्षः ।**

दूरस्थशब्दस्य वीचीतरंगन्यायेन कदम्बमुकुलन्यायेन वा शब्दाच्शब्दान्तरोत्पत्ति क्रमेण श्रोत्रदेशे जातस्य शब्दस्य श्रोत्रेण सम्बन्धात्प्रत्यक्षत्व सम्भवात् ।

5. **समवेतसमवायः**

**शब्दत्वसाक्षात्कारे समवेतसमवाय सन्निकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।**

6. **विशेषणविशेष्यभावः**

**अभावप्रत्यक्षे विशेषणविशेष्यभाव सन्निकर्षः । घटाभाववद्भूतलमित्यत्र चक्षुसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।**

भूतलं विशेष्यं, घटाभावो विशेषणम् ।

**एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं, तस्मादिन्द्रिरियं प्रत्यक्षप्रमाणमिति सिद्धम् ।**

**अनुमानप्रमाणम् ।**

**अनुमानम्**

**अनुमितिकरणमनुमानम् ।**

**अनुमिति**

**परामर्शजन्यं ज्ञानमनुमिति ।**

ननु संशयोत्तरप्रत्यक्षे अतिव्याप्तिः, स्थाणुपुरुष संशयानन्तरं पुरुषत्वव्याप्य करादिमानयमिति परामर्शे सति पुरुष एवेति प्रत्यक्षजननात्,न च तत्र अनुमितिरेवेति वाच्यम् । पुरुषं साक्षात्करोमि इत्यनुव्यवसायविरोधादिति चेन्न, पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात् ।सिषाधयिषाविरह विशिष्ट

सिद्ध्यभावः पक्षता । साध्यसिद्धिरनुमितिप्रतिबन्धिका । सिद्धिसत्वेऽप्यनुमिय अनुमिति **द**र्शनात्सिषाधयिषोत्तेजिका ।ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत् सिषाधयिषाविरहसहकृतसिद्ध्यभावस्याप्यनुमिति कारणत्वात्।

**परामर्शः**

**व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वह्निव्याप्य धूमवानयं पर्वतः इति ज्ञानं परामर्शः ।तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः ।**

व्याप्तिविषयकं यत्पक्षधर्मता ज्ञानं स परामर्शः इत्यर्थः ।

**व्याप्तिः**

**यत्र यत्र धूमः तत्र तत्र वह्निरिति साहचर्यनियमो व्याप्तिः ।**

साहचर्यं नाम समानाधिकरण्यं, तस्य नियमः – हेतुसमानाधिकरणात्यन्ताभाव अप्रतियोगिसाध्यसमानाधिकरण्यं व्याप्तिः इति ।

**पक्षधर्मता**

**व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।**

**अनुमानभेदौ**

**अनुमानं द्विविधं – स्वार्थं परार्थं च ।**

**स्वार्थानुमानम्**

**तत्र स्वार्थं स्वानुमितिहेतुः तथाहि – स्वयमेव भुयो दर्शनेन यत्र यत्र धूमः तत्र तत्र वह्निरितिमहानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्यप्तिं स्मरति यत्र यत्र धूमः तत्र तत्र वह्निरिति । तदनन्तरं वह्निव्याप्य**

**धूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्शः इत्युच्यते । तस्मात् पर्वतो वह्निमानिति ज्ञानमुत्पद्यते ।तदेतत्स्वार्थानुमानम् ।**

ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेऽपि धूमादौ व्यभिचार उपलब्धेर्भूयो दर्शनेन कथं व्याप्तिग्रहं इति चेन्न, व्यभिचारज्ञानविरहसहकृत सहचार ज्ञानस्य व्याप्तिग्रहत्वात् ।व्यभिचारज्ञानं द्विविधं – निश्चयः, शङ्का च ।तद्विरः क्वचित्तर्कात्, क्वचित्स्वतःसिद्धःएव ।धूमाग्न्योर्व्याप्तिग्रहे कार्यकारणभावभङ्गप्रसङ्ग लक्षणस्तर्को व्यभिचारशङ्कानिवर्तकः।ननु सकलवह्निधूमयोरसन्निकर्षात्कथं व्याप्ति ग्रह इति चेन् ,वह्नित्वधूमत्वरूपसामान्यलक्षणप्रत्यासत्या सकलवह्निधूम ज्ञान सम्भवात्। तस्मात् लिङ्गपरामर्शादत्यर्थः ।

**<u>परार्थानुमानम्</u>**

**यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम् । यथा- पर्वतो वह्निमान्, धूमवत्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायम्, तस्मात्तथेति । अनेन प्रतिपादितात् लिङ्गात् परोऽप्यग्नि प्रतिपद्यते ।**

**<u>पञ्चावयवाः</u>**

**प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः ।**

साध्यवत्तया पक्षवचनं प्रतिज्ञा, पर्वतो वह्निमानिनि । पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः, धूमवत्वादिति। व्याप्तिप्रतिपादकं वचनमुदाहरणम्, यो यो धूमवान् स स वह्निमान् यथा महानसम् । व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः, तथा चायम् । हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्, तस्मात्तथेति ।

पक्षज्ञानं प्रतिज्ञा प्रयोजनम् । लिङ्गज्ञानं हेतुप्रयोजनम् । व्याप्तिज्ञानमुदाहरण

प्रयोजनम् ।पक्षधर्मताज्ञानं उपनयप्रयोजनम् ।अबाधितत्वादिकं निगमन प्रयोजनम्।

**स्वार्थानुमितिपरार्थानुमित्योः कारणम्**

**स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्शः एव करणम् । तस्माल्लिङ्गपरामर्शो अनुमानम् ।**

ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेव अनुमितिसम्भवे व्याप्तिविशिष्टलिङ्ग परामर्शः किमर्थमङ्गीकर्तव्यमिति चेन्न, वह्निंव्याप्यधूमवानयमिति शाब्दपरामर्श स्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शसैव कारणत्वात्। लिङ्गं न करणं – अतीतानागतादौ व्यभिचारात् । व्यापरवत्कारणं करणमिति मते परामर्श द्वारा व्याप्तिज्ञानं करणम् । तज्जन्यतवे सति तज्जन्यजनको व्यापरः।

**लिङ्गभेदाः**

**लिङ्गं त्रिविधम् – अन्वयव्यतिरेकि – केवलान्वयि – केवलव्यतिरेकि चेति ।**

**अन्वयव्यतिरेकि**

**अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि ।**

हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः तदाभवयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ।यथा वह्नयथा वह्नौ साध्ये धूमवत्वम् । यत्र धूमस्तत्रऽग्नि यथा महानसमित्यन्वयव्यप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः ।

**केवलान्वयि**

**अन्वयमात्रव्याप्तिकं केवलान्वयि ।**

केवलान्वयिसाधकं लिङ्गं केवलान्वयि । अत्यन्ताभावाप्रतियोदित्वं केवलान्वयित्वम्।
यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् ।अत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिः नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ।

**केवलव्यतिरेवि**

**व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा – जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र यद् गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात् ।**

नन्वितरभेदः प्रसिद्धो वा न वा ? आद्यो यत्र प्रसिद्धस्तत्र हेतुसत्वे(न्वयित्वम्, असत्वे साधारण्यम्, द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः विशेषणज्ञान अभावे विशिष्टज्ञानानुदयात्,प्रतियोगिज्ञानाभावद्व्यतिरेकव्याप्तिज्ञानमिति स्यादिति चेन्न, जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते तत्र त्रयोदशत्वावच्छिन्नभेदात्मक साध्यस्यैकाधिकरणवृत्तितिवाभावात् न अन्वयित्वासाधारण्ये, प्रत्येकाधिकरणे प्रसिद्ध्या साध्यविशिष्टानुमिति, साध्याभाव व्यापकीभूताभावमिति व्यतिरेकव्याप्ति निरूपणं च यदितरेति ।

**पक्षः**

**सन्दिग्धसाध्यवान् पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः।**

ननु श्रावणानन्तरभाविमननस्थले)व्याप्तिः, तत्र वेदवाक्यैरात्मनो निश्चितत्वेन सन्देहाभावात्, किञ्च प्रत्यक्षे)पि वह्नौ यत्रेच्छयानुमितिस्तत्राव्याप्तिरिति चेन्न, उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात् ।

**सपक्षः**

**निश्चितसाध्यवान् सपक्षः। यथा तत्रैव महानसम् ।**

**विपक्षः**

**निश्चितसाध्य (भाववान् विपक्षः । यथा तत्रैव महाह्रदः।**

**हेत्वाभासः**

**सव्यभिचारविरूद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।**

अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ।

**सव्यभिचारः।**

**सव्यभिचारोऽनैकान्तिकः । स त्रिविधः-साधारणाऽसाधारणनुपसंहारिभेदात्।**

**साधारणा**

**तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वादिति ।तत्र प्रमेयत्वस वह्न्यभाववति ह्रदे विद्यमानत्वात्।**

**असाधारणा**

**सर्वसपक्षविपक्षव्यवृतःपक्षमात्रवृत्तिरसाधारणः।यथा –शब्दो नित्यः शब्दत्वादिति ।शब्दत्वं इति सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यवृत्तं शब्दमात्रवृत्ति ।**

**अनुपसंहारी**

**अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वदिति। अत्र सर्वस्यापि पक्षत्वद् दृष्टान्तो नास्ति ।**

**विरूद्धः**

**साध्याभावव्याप्तो हेतुर्विरूद्धः । यथा शब्दो नित्यः कृतकत्वादिति ।अत्र कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम् ।**

**सत्प्रतिपक्षः**

**यस्य साध्याभावसाधकत्वं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत् । शव्दोऽनित्योः। कार्यत्वाद् घटवत् ।**

**असिद्धः**

**असिद्धस्त्रिविधः,आश्रयासिद्धः,स्वरुपासिद्धः,व्याप्यत्वासिद्धश्चेति ।**

**आश्रयासिद्धः**

**आश्रयासिद्धो यथा –गगनारविन्दं सुरभिः अरविन्दत्वात् सरोजारविन्दत्वत् ।अत्र गगनारविन्दमाश्रयःस च नास्येव ।**

**स्वरूपासिद्धः**

**स्वरूपासिद्धो यथा –शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति , शव्दस्य श्रावणत्वात् ।**

**व्याप्यत्वासिद्धः**

**सोपाधिको हेत् प्यत्वाासिद्धः। साध्यव्यापकत्वे साधनाव्यापकत्वमुपाधित्वम्।साध्यसमानाधिकरणाात्यन्ताााभावाप्रतियोगित्वम् – साध्यव्यापकत्वात् ।साधनवन्निष्ठाात्यन्ताााभावााप्रतियोगित्वम् साधनााव्यापकत्वम्। यथा पर्वतो धूमवान् वह्निमत्वादित्यत्राार्द्रेन्धनसंयोग उपाधिः।तथाहि र धूमस्तत्राार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम् ।यत्र वह्नि स्तत्राार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्देन्धनसंयोगााभावादिति साधनााव्यपकत्वम् । एवं साध्यव्यापकत्वे सति साधनााव्यपकत्वादर्द्रेन्धनसंयोग उपाि सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वाासिद्धम् ।**

उपाधिश्चतुर्विधः-केवलसाध्यव्यापकः,पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकः, उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति ।आद्यः – आर्देन्धनसंयोगः।द्वितायो यथा – वायु प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्वम् । तृतीयो यथा – प्रध्वंशो विनाशी जन्मत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम् । चतुर्थो यथा – प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकभावत्वम् ।

**बाधितः**

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रा/नुष्णत्वं साध्यं , तदाभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम् ।

--------